# A-II/1/1390/22

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'रत्नकरण्डश्रावकाचारः' इत्यस्य कोऽर्थः?
2. तपस्विनः लक्षणं पाठ्यग्रन्थदिशा लिखत।
3. समन्तभद्राचार्यस्य रचनाः सूच्यन्ताम्।
4. ग्रन्थकृता मूढता का? कतिविधा च प्रोक्ता?
5. 'देशयामि समीचीनं धर्मं' इति वाक्येन किमुच्यते? स्पष्टयत।
6. हिंसादेः निवर्तना कथं हि कृता भवति?
7. अहिंसाणुव्रतस्य अतिचाराः कति? के च ते?
8. पाठ्यग्रन्थदिशा अष्टमूलगुणाः संसूचयितव्याः।
9. हिंसादानं नाम अनर्थदण्डः निरूप्यताम्।
10. पाठ्यग्रन्थदिशा शिक्षाव्रतानि निर्देष्टव्यानि।
11. तस्माद्यावद्विभवं समाधिमरणे प्रयतितव्यम् इत्यनेन किं ज्ञायते?

**अथवा**

"स्वजनं परिजनमपि च क्षान्त्वा क्षमयेत् प्रियवचनैः" इत्यस्य कोऽर्थः?

12. निःश्रेयसः स्वरूपं पाठ्यग्रन्थदिशा लिखत।

**अथवा**

"जीवितमरणाशंसे भयमित्रस्मृतिनिदाननामानः" इत्यस्य कोऽर्थः?

13. श्रावकपदानि देवैरेकादश देशितानि। कानि तानि? लिखत।

**अथवा**

सचित्तव्यागात् सचित्तविरतो दयामूर्त्तिः कथं भवति?

14. कः खलु श्रेयसो ज्ञाता भवति?

**अथवा**

"कुलमिव गुणभूषा कन्यका संपुनीताज्जिनपदपद्मप्रेक्षिणी दृष्टिलक्ष्मीः" इत्यस्य कोऽर्थः?

15. सम्यग्दर्शनस्य प्रभावाज्जीवः किं न प्राप्नोति?

**अथवा**

'सम्यग्दर्शनहेतोः मनुष्याः पाठ्यग्रन्थे कीदृशाः प्रतिपादिताः भवन्ति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पाठ्यग्रन्थदिशा सम्यग्ज्ञानं विशदयत।

17. "अष्टावाश्रित्य मानित्वं स्मयमाहुर्गतस्मयाः" इति वचनं सप्रसङ्गं विशदयत।

18. अहिंसाणुव्रतस्य पञ्च अतिचाराः पाठ्यग्रन्थदिशा समवबोधनीयाः।

**अथवा**

स्वदारसंतोषव्रतं समीक्षत।

19. भोगोपभोगपरिमाणव्रतं समालोचयत।

**अथवा**

अनर्थदण्डव्रतस्योपपत्तिः इति विषये सारपूर्णटिप्पणी कार्या।

20. "नियमो यमश्च विहितौ द्वेधा भोगोपभोगसंहारे।
नियमः परिमितकालो यावज्जीवं यमो ध्रियते॥" -इति श्लोकं सप्रसङ्गं व्याख्यात।

**अथवा**

सम्यग्दर्शनं नाङ्गहीनं स्यादित्यस्य तात्पर्यं स्फुटयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. पञ्चाणुव्रतानि कानि तत्पालनकर्तृषु प्रसिद्धाः के? वर्णयत।

**अथवा**

आचार्यसमन्तभद्रस्य व्यक्तित्वं कृतित्वञ्च वर्णयत।

**अथवा**

"चत्वारि शिक्षाव्रतानि" पाठ्यग्रन्थदिशा विवेचनीयानि।

# A-II/2/1391/22

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. समयसारस्य मूलप्राकृतनाम किमस्ति ?
2. समयसारस्य अमृतचन्द्रसूरिकृतायाः टीकायाः नाम किम् ?
3. 'प्रत्यगात्मनः' इत्यनेन किं तात्पर्यम् ?
4. स्वसमयः कः प्रोक्तः ?
5. 'शुद्धात्मा' कीदृशः प्रोक्तः ?
6. 'जाणगो सुद्धो' इत्यनेन किमभिधीयते ?
7. 'ववहारेण विणा परमत्थुवएसणभसक्कं' इत्यनेन किमुक्तम् ?
8. 'ववहारोभूदात्थो' इत्यनेन किं प्रयोजनम् ?
9. 'सम्मत्तं' किं प्रोक्तम् ?
10. 'सुद्धणओ' इत्यनेन किं तात्पर्यम् ?
11. 'अप्पदिबुद्धो' इत्यनेन किमुक्तम् ?

**अथवा**

'केवलिगुणे थुणदि जो सो तच्चं केवलिं थुणदि' इत्यनेन किं तात्पर्यम् ?

12. प्रत्याख्यानं किमुच्यते ?

**अथवा**

'मोहणिम्मभत्तं' इत्यनेन किं तात्पर्यम् ?

13. 'धम्मणिम्ममत्तं' किमुच्यते ?

**अथवा**

संसारप्रमुक्तानां वर्णादयः सन्ति न वा ?

14. अमृतचन्द्रसूरिविरचितसमयसारव्याख्यायां प्रथमाङ्कस्य नाम किमस्ति ?

**अथवा**

जितमोहः कः प्रोक्तः ?

15. क्षीणमोहः किमुच्यते ?

**अथवा**

अध्यवसानभावाः के सन्ति ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. सुदपरिचिदाणुभूदा सव्वस्स वि कामभोबकंधकहा।
एयत्तस्सुवलंभो णवरि ण सुलहो विहत्तस्स॥ -इति गाथा व्याख्येया।

17. ववहारोऽभूयत्थो भूयत्थो देसिदो दु सुद्धणओ।
भूयत्थमस्सिदो खलु सम्माइट्ठी हवइ जीवो॥ -इति गाथायाः व्याख्या कार्या।

18. जीवस्य स्वरूपं ग्रन्थानुसारेण स्पष्टयत।

**अथवा**

कम्मे णोकम्मम्हि य अहमिदि अहकं च कम्म णोकम्मं।
जा एसा खलु बुद्धी अप्पडिबुद्धो हवदि ताव॥ -इति गाथां विवेचयत।

19. जह णाम कोवि पुरिसो परदव्वमिणंति जाणिदुं चयदि।
तह सव्वे परभावे णाऊण विमुंचदे णाणी॥ -इति गाथा व्याख्येया।

**अथवा**

एए सव्वे भावा पुग्गलदव्वपरिणामणिप्पण्णा।
केवलि जिणेहिं भणिया कह ते जीवो त्ति वुच्चंति॥ -इति गाथायाः व्याख्या कार्या।

20. एएहिं य संबंधो जहेव खीरोदयं मुणेयव्वो।
ण य हुंति तस्स ताणि दु उवओगगुणाधिगो जम्हा॥ -इति गाथा व्याख्येया।

**अथवा**

तत्थभवे जीवाणं संसारत्थाण होंति वण्णादी।
संसारपमुक्काणं णत्थि हु वण्णादओ केई॥ -इति गाथायाः व्याख्या विधेया।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. समयसारस्य महत्त्वं प्रतिपादयत।

**अथवा**

पठितांशस्य सारांशो महत्त्वं च लेखनीयम्।

**अथवा**

प्राकृतभाषायाः साहित्यस्य च वैशिष्टयं लिखत।

# A-II/3/1392/22

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. स्याद्वादमञ्जरी केन विरचिता?
2. स्याद्वादमञ्जरी टीकाग्रन्थो मूलग्रन्थो वा?
3. पाठ्यग्रन्थस्य प्रतिपाद्यविषयः कः वर्तते?
4. पाठ्यग्रन्थस्य मङ्गलाचरणं लिखत।
5. पदार्थाः स्वभावात् कीदृशाः भवन्ति?
6. 'सर्वे हि भावा द्रव्यार्थिकनयापेक्षया नित्याः' अस्यार्थं लिखत।
7. 'अबाध्यसिद्धान्तः' अस्य पदस्य कः अर्थः?
8. सौगताः के भवन्ति?
9. सांख्यदर्शनस्य प्रवर्तकः कः अस्ति?
10. स्याद्वादस्य सप्तभङ्गानां नामानि लिखत।
11. कस्य मते पदार्थः क्षणिकः भवति?

**अथवा**

'जे सव्वं जाणइ से उगं जाणइ' अस्य कः अर्थः?

12. 'आत्मनः व्यतिरिक्तं ज्ञानाख्यं गुणम्' इति केषां मतम्?

**अथवा**

'अतीतदोषम्' अर्थं स्पष्टयत।

13. समवायः कः अस्ति?

**अथवा**

'पुण्यपापक्षयो मोक्षः' इत्यस्य अर्थं लिखत।

14. पदार्थाः अनित्याः कथं भवन्ति ?

**अथवा**

वैशेषिकमते द्रव्याणि कति स्वीकृतानि ?

15. 'निर्विशेषं हि सामान्यं भवेत् खरविषाणवत्' अस्य कथनस्य अर्थं स्पष्टयत।

**अथवा**

'जिनमाप्तमुख्यम्' अस्य पदस्य अर्थं लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. भगवतः अतिशयान् ग्रन्थदिशा विवेचयत।

17. पाठ्यग्रन्थदिशा आत्मस्वरूपं वर्णयत।

18. कर्तास्ति कश्चिज्जगतः सचैकः सः सर्वगः स स्ववशः सः नित्यः।

इमाः कुहेवाकविडम्बनाः स्युस्तेषां न येषामनुशासकस्त्वम्॥

–अस्य श्लोकस्य व्याख्यां कुरुत।

**अथवा**

'स्वपुत्रघाताद् नृपतित्वलिप्सा सब्रह्मचारि स्फुटितं परेषाम्' श्लोकांशस्य अर्थं लिखत।

19. 'सर्वं वै खल्विदं ब्रह्म' व्याख्यां कुरुत।

**अथवा**

'सर्वमस्ति स्वरूपेण पररूपेण नास्ति च'। अर्थं स्पष्टयत।

20. एकस्य श्लोकस्य अर्थं लिखित्वा व्याख्या कार्या –

घटमोलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्। शोकप्रमोदमाध्यस्थं जनो याति सहेतुकम्॥

**अथवा**

पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः। अगोरसव्रतो नोभे तस्माद् वस्तु त्रयात्मकम्॥

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. सप्तभङ्गी–सिद्धान्तोऽयं विवेचनीयः ग्रन्थदिशा।

**अथवा**

ग्रन्थग्रन्थकारयोः विस्तरेण परिचयः लेखनीयः।

# A-II/4/1393/22

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'अथ प्राकृतम्' इत्यत्र अथशब्देन किं तात्पर्यम्?
2. 'बहुलम्' इति सूत्रस्य किं प्रयोजनम्?
3. 'दीर्घ-ह्रस्वौ मिथो वृत्तौ' इत्यत्र 'वृत्तौ' इत्यनेन किमभिधीयते? उदाहरणमेकं देयम्।
4. 'उद्वृत्तस्वरः' किमुच्यते?
5. 'सर्वतः' इति शब्दस्य किं प्राकृतरूपम्?
6. प्राकृतशब्दस्य कानि प्राकृतरूपाणि भवन्ति? नामानि लिखत।
7. स्वप्नशब्दस्य प्राकृतरूपं किम्?
8. 'बम्हचेरं' इति शब्दस्य संस्कृतरूपम् किम्?
9. 'ओत्संयोगे' इति सूत्रस्य किं प्रयोजनम्? सोदाहरणं लिखत।
10. 'इत्कृपादौ' इति सूत्रस्य सोदाहरणं प्रयोजनं लिखत।
11. 'ऐत एत्' इति सूत्रस्य उदाहरणं देयम्।

**अथवा**

'कन्दुकम्' इत्यस्य प्राकृतरूपं किं भवति?

12. 'प्रतिमा' शब्दस्य प्राकृतरूपं किम्? नियमपूर्वकं लिखत।

**अथवा**

'नो णः' इति सूत्रस्य प्रयोजनपूर्वकम् उदाहरणं प्रदेयम्।

13. 'क्षः खः क्वचित्तु छ-झौ' इति सूत्रस्य सोदाहरणं प्रयोजनं लिखत।

**अथवा**

'म्नज्ञोर्णः' इति सूत्रस्य उदाहरणं देयम्।

14. ‘ष्टस्यानुष्ट्रेष्टा सदंष्टे’ इति सूत्रं सोदाहरणं स्पष्टयत।

**अथवा**

‘ष्य-स्पयोः फः’ इति सूत्रं दृष्टान्तपूर्वकं विवेचयत।

15. ‘अधो मनयाम्’ इति सूत्रं दृष्टान्तसहितं स्पष्टयत।

**अथवा**

पडमं इति प्राकृतरूपस्य संस्कृतरूपं किं भवति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. ‘इतेः स्वरात् तश्च द्विः’, ‘अतः समृद्ध्यादौ वा’ इति सूत्रद्वयं सोदाहरणं विवेचयत।

17. ‘ह्रस्वः संयोगे’ ‘ऋतोत्’ इति सूत्रद्वयं दृष्टान्तपूर्वकं विवेचयत।

18. ‘क-ग-प-ज-त-द-प-य-वां प्रायो लुक्’ इति सूत्रस्य तात्पर्यं विलिख्य सर्वेषां वर्णानां दृष्टान्तपूर्वकं विवेचनं कुरुत।

**अथवा**

‘ख-घ-थ-ध-भाम्’ इति सूत्रस्य सोदाहरणं विवेचनं कुरुत।

19. ‘टो डः’, ‘ठो ढः’ ‘डो लः’ इति सूत्रत्रयस्य उदाहरणपूर्वकं व्याख्यानं कुरुत।

**अथवा**

‘अतसी सातवाहने लः’ ‘पो वः’, ‘यष्टयां लः’ इति सूत्रत्रयस्य प्रयोजनं दृष्टान्तं च लिखत।

20. ‘क-ग-ट-ड-त-द-प-श-ष-स- ᳵ क - ᳶ पामूर्ध्वं लुक्’ इति सूत्रस्य सोदाहरणं विवेचनं कुरुत।

**अथवा**

‘सर्वत्र लबराभवन्द्रे’ इति सूत्रं सोदाहरणं व्याख्यात।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयाः।** **(1×20=20)**

21. शौरसेनीप्राकृतस्य विशेषनियमाः लेखनीयाः।

**अथवा**

प्राकृतभाषायाः सन्धिनियमाः लेखनीयाः।

**अथवा**

प्राकृतभाषायाः प्राकृतसाहित्यस्य च महत्त्वं प्रतिपादयत।

# A-II/5/1394/22

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. जैनशब्दस्य किं तात्पर्यम्।
2. जैनदर्शने कालस्य भेदं लिखत।
3. उत्सर्पिणीकालेन किं तात्पर्यम्।

**अथवा**

वर्तमानकालस्य नाम लिखत।

4. आदितीर्थंकरस्य नाम किम्?

**अथवा**

पञ्चदशः संख्यकः तीर्थंकरः कोऽस्ति?

5. कुलकरेण किं तात्पर्यम्?

**अथवा**

अंतिमकुलकरस्य नाम किम्?

6. "श्रुतकेवली" इत्यनेन किं तात्पर्यम्?
7. जम्बूस्वामी क्वासीत्?
8. आगमस्य लक्षणं किम्?
9. द्रव्यस्य कति भेदाः सन्ति?
10. मोक्षस्य लक्षणं लिखत।

**अथवा**

मोक्षमार्गस्य लक्षणं लिखत।

11. प्रमाणस्य लक्षणं लिखत।

12. न्यायस्य चतुरङ्गाणां नामानि लिखत।

**अथवा**

आन्वीक्षिकीविद्यायाः अपरनाम किम्?

13. हेतोः लक्षणं लिखत।

14. अनेकान्तस्य लक्षणं लिखत।

15. नयस्य स्वरूपं लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. प्रागैतिहासिककाले जैनधर्मस्य स्वरूपं लिखत।

17. ऋषभदेवस्य परिचयं लिखत।

**अथवा**

ऋषभदेवकालीनषड्कर्मव्यवस्थायाः स्वरूपं लिखत।

18. मोक्षमार्गस्य स्वरूपं लिखत।

**अथवा**

जैनदर्शने रत्नत्रयस्य स्वरूपं लिखत।

19. आचार्यकुन्दकुन्दस्य परिचयं लिखत।

**अथवा**

आचार्ययशोविजयस्य कृतित्वं लिखत।

20. श्रावकाचारस्य स्वरूपं लिखत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. जैनधर्मस्य परम्परायाः उद्भवविकासोपरि विशेषवर्णनं लिखत।

**अथवा**

आगमपरम्परायाः परिचयं लिखत।